श्री गोविंद दामोदर स्तोत्रं

श्री गोविंद दामोदर स्तोत्रं

श्रीकृष्ण गोविंद हरे मुरारे
हे नाथ नारायण वासुदेव |
जिह्वे पिबस्वामृतमेतदेव
गोविंद दामोदर माधवेति || 1 ||

विक्रेतुकामाखिलगोपकन्या
मुरारिपादार्पितचित्तवृत्तिः |
दध्यादिकं मोहवशादवोचत्
गोविंद दामोदर माधवेति || 2 ||

गृहे गृहे गोपवधूकदंबाः
सर्वे मिलित्वा समवाप्य योगं |
पुण्यानि नामानि पठंति नित्यं
गोविंद दामोदर माधवेति || 3 ||

सुखं शयाना निलये निजेऽपि
नामानि विष्णोः प्रवदंति मर्त्याः |
ते निश्चितं तन्मयतां व्रजंति
गोविंद दामोदर माधवेति || 4 ||

जिह्वे सदैवं भज सुंदराणि
नामानि कृष्णस्य मनोहराणि |
समस्त भक्तार्तिविनाशनानि
गोविंद दामोदर माधवेति || 5 ||

सुखावसाने इदमेव सारं
दुःखावसाने इदमेव ज्ञेयं |
देहावसाने इदमेव जाप्यं
गोविंद दामोदर माधवेति || 6 ||

जिह्वे रसज्ञे मधुरप्रिये त्वं
सत्यं हितं त्वां परमं वदामि |
अवर्णयेथा मधुराक्षराणि
गोविंद दामोदर माधवेति || 7 ||

त्वामेव याचे मम देहि जिह्वे
समागते दंडधरे कृतांते |
वक्तव्यमेवं मधुरं सुभक्त्या
गोविंद दामोदर माधवेति || 8 ||

श्रीकृष्ण राधावर गोकुलेश
गोपाल गोवर्धननाथ विष्णो |
जिह्वे पिबस्वामृतमेतदेव
गोविंद दामोदर माधवेति || 9 ||